दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-118 | 1 | फरवरी 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लप्रतिपदा
फाल्गुण 06 प्रविष्ठांशः मङ्गलमयः भवेत्


2 हिमाचल- विधानसभा- बजटसत्रम्: विधायक- निधि- स्थगनविषये सदने सुक्खु-जयराम योः परस्परं वाग्युद्धम्

3 याचनानां पूर्तये चौड़ा-मैदाने गर्जिताः सेवानिवृत्त- कर्मचारिणां (Pensioners), सर्वकारस्य उपरि गम्भीराः आरोपाः तीव्रं घोषणम्

5 कविकुलगुरुकालिदाससंस्कृत विश्वविद्यालयाय 'महाराष्ट्रस्य सर्वश्रेष्ठ-केन्द्र-पुरस्कारः'


## बांग्लादेशे नूतन-सर्वकारस्य गठनम्



**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।**बांग्लादेश-नेशनलिस्ट पार्टी (बीएनपी) इत्यस्य प्रमुखः तारिक रहमानः बांग्लादेशस्य नूतन-प्रधानमन्त्रिपदस्य शपथं गृहीतवान्। ध्यातव्यं वर्तते यत् निर्वाचनेषु बीएनपी दलेन प्रचण्डं बहुमतं प्राप्तम्। परम्परां परित्यज्य, राष्ट्रपतिः मोहम्मद शहाबुद्दीनः ६० वर्षीयं रहमानं 'बंगभवन' स्थाने जातीय-संसदः 'साउथ प्लाजा' इत्यत्र पदस्य गोपनीयतायाश्च शपथं कारितवान्। अस्मिन् शपथग्रहण-समारोहे भारतस्य लोकसभा-अध्यक्षः ओम बिरला अन्ये च अनेके विदेशी-नेतारः उपस्थिताः आसन्। अस्मात् पूर्वं बीएनपी-दलस्य श्री रहमानः संसदीय-दलस्य नेता इति रूपेण चितः। अवधेयमस्ति यत् १३ तमे संसदीय-निर्वाचने बीएनपी दलेन २९७ आसनेषु २०९ आसनानि जितानि। दक्षिणपन्थी 'जमात-ए-इस्लामी' दलम् ६८ आसनानि प्राप्तवान्। पूर्व-प्रधानमन्त्रिणः शेख हसीना इत्यस्याः 'अवामी लीग' दलम् अस्मिन् निर्वाचने भागं ग्रहीतुं निषिद्धम् आसीत्।

## भारत-फ्रांसयोर्मध्ये सुरक्षा-व्यापार-सांस्कृतिक-सम्बन्धानां परस्परादानप्रदानक्षेत्रे रणनीतिक सहयोगम् अधिकृत्य द्विपाक्षिक सम्वादम्



**हिमसंस्कृतवार्ताः** प्रधानमन्त्री नरेन्द्रमोदी फ्रांसस्य राष्ट्रपतिः इमैनुएलमैक्रों च मुम्बय्याः लोकभवने द्विपाक्षिक सम्वादम् अकुरुताम्। द्वावेव नेतारौ सुरक्षा-व्यापार-सांस्कृतिक सम्बन्धानां परस्परादानप्रदानक्षेत्रे भारत-फ्रांसयोर्मध्ये रणनीतिक सहयोगम् अधिकृत्य चर्चा कृतवन्तौ। अस्यां चर्चायां विविधानि सन्धिपत्राणि हस्ताक्षरितानि भवितुम् अर्हन्ति । फ्रांसराष्ट्रपतिः इमैनुएलॉ-मैक्रों इत्यसौ स्वीयायाः मुम्बय्याः यात्रावधौ ऐतिहासिके ताजमहल-पैलेस-होटल इत्यत्र नवम्बरमासस्य षड्विंशतिदिनाङ्के जाते आतङ्की प्रहारे मृतानां कृते पीडितानां कृते च श्रद्धाञ्जलिं प्रायच्छत् सहैव आतकं विरुध्य भारतेन सह एकतायाः सन्देशम् अपि अयच्छत् ।

## आगामिवर्षद्वये भारतस्य ए.आई- इत्यस्य तन्त्रविस्तारे अधिकनिवेशम् आकर्षयितुं भारतं सज्जं वर्तते - अश्विनीवैष्णवः



**हिमसंस्कृतवार्ताः** - सूचना-प्रसारण-मंत्री अश्विनीवैष्णवः अवदत् यत् आगामिवर्षद्वये भारतस्य ए आई-इत्यस्य तन्त्रविस्तारे द्विशत-महार्बुद-डालर-मितः अपि अधिकः निवेशः अपेक्षितः वर्तते। नवदेहल्याम् इण्डिया-ए.आई इम्पैक्ट-समिट् इति विषयम् अधिगृत्य वार्ताहरान् सम्बोधयन् श्री वैष्णवः अवदत् यत्, अस्मै शिखरसम्मेलनाय महत्यः प्रतिक्रियाः प्राप्ताः सन्ति, यत्र देशस्य विभिन्नक्षेत्रेभ्यः जनाः आगच्छन्ति । इंडिया-ए.आई-इम्पैक्ट समिट इत्यस्य द्वितीय-दिवसस्य शिखरसम्मेलने उच्च-स्तरीय-समूह-चर्चायाः श्रृङ्खला आयोजिता अस्ति, या सर्वसमावेशि-परिवर्तनशील-वृद्ध्यै कृत्रिम बुद्धिचातुर्यस्य उपयोगे केन्द्रिता अस्ति। शिखरसम्मेलनस्य द्वितीये दिने स्वास्थ्योर्जा-शिक्षा-कृषि-लैगिक - सशक्तीकरण-सौलभ्य चेत्यादिषु विषयेषु ज्ञानसङ्ग्रहः लोकार्पितः भविष्यति। स्वास्थ्य राज्यमन्त्री अनुप्रियापटेलः "इन्नोवेशन टु इम्पैक्ट ए आई इज ए पब्लिक हैल्थ-गेम-चेञ्जर" इति विषये आयोजिते सत्रे भागम् ग्रहीतवती ।

### सम्प्रति राष्ट्रम् ज्ञानकेन्द्रितः समाजः भवितुं विद्यासोन्मुखम् अस्ति - धर्मेन्द्रप्रधानः

केन्द्रीय-शिक्षा-मंत्री धर्मेन्द्रप्रधानः अवदत् यत् ए.आई इति कृत्रिमबुद्धिमत्ता शिक्षा च परस्परं पूरके स्तः। नवदेहल्यां 'पुशिङ्ग द फ्रंटियर ए.आई. इन इण्डिया-इति विषयमधिकृत्य ए.आई. इम्पैक्ट-समिट "इति कार्यक्रमस्य द्वितीयदिनम् सम्बोधयन् श्रीप्रधानः अवदत् यत् सम्प्रति राष्ट्रम् ज्ञानकेन्द्रितः समाजः भवितुं विद्यासोन्मुखम् अस्ति । ध्यानास्पदं वर्तते यत् सर्वसमावेशि-परिवर्तनशील-वृद्ध्यै कृत्रिम बुद्ध्याः उपयोगविषये केन्द्रितानाम् उच्च-स्तरीय-समूह-चर्चानां श्रृङ्खला आयोजिता अस्ति।




## जयपुर-नगरे कृषकेभ्यः डिजिटल-सहचरूपेण 'भारत-विस्तारः" इत्यस्य उदघाटनं कृतवान् शिवराजसिंहचौहानः

**हिमसंस्कृतवार्ताः** - केन्द्रीय-कृषि-कल्याणमन्त्री शिवराजसिंहचौहानः जयपुर-नगरे कृषकेभ्यः डिजिटल-सहचरूपेण 'भारत-विस्तारः" इत्यस्य उद्घाटनं कृतवान्। कृषकाः प्रवीणाः, सशक्ताः, सूचनासमृद्धाः च भवेयुः इति अस्य उपक्रमस्य लक्ष्यम् अस्ति। अनेन मञ्चेन कृषकाः स्वीये दूरभाषयन्त्रे सर्वाः आवश्यक सूचनाः प्राप्तुं शक्नुवन्ति । अस्मिन् अवसरे जनसमूहं सम्बोधयन् केन्द्रीयकृषिमन्त्री एतम् उपक्रमं कृषिक्षेत्रे डिजिटल क्रान्तिं प्रति ऐतिहासिकं सोपानम् इति वर्णितवान्। सः अवदत् यत् अयं उपक्रमः कृषकेभ्यः सस्याधारित वैज्ञानिक-परामर्शसेवाः, शस्यापण-मूल्यानि, वायुगुण-सूचनाः च प्रददाति । सः इत्यपि अवदत् यत् कृषकाणाम् आयं वर्धयितुं न केवलं कृषि कार्येण सह अपितु पशुपालनेन सह अपि सामञ्जस्यम् आवश्यकम् अस्ति, यस्य ते तन्त्रज्ञानं महत्त्वपूर्णम् अस्ति। राजस्थानस्य मुख्यमन्त्री भजनलालशर्मा एतं डिजिटल-उपक्रमं कृषकाणां क्रान्तेः आरम्भः इति अवोचत्, कृषकाः अस्य अधिकतमं उपयोगं कुर्युः इति च समुद्घोषयत् ।

## सुभाषितम्

**उच्चैः पदमधितिष्ठितं,
लोकस्तत्त्वेषु मुह्यति प्रायः।
विषममपि पश्यति समं ,
पर्वतशिखराग्रमारूढः।।**

प्रायः उच्च पद पर नियुक्त व्यक्ति वास्तविक स्थिति से उसी प्रकार अनभिज्ञ तथा सम्मोहित से रहते हैं जिस प्रकार एक ऊंचे पर्वत शिखर पर खडे होकर नीचे की ओर देखने से धरातल पर स्थित प्रत्येक वस्तु साधारण और सपाट दिखाई देती है।


दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## राष्ट्रपतिः नौसैन्यशक्तेः निरीक्षणम् करिष्यति

भारतस्य राष्ट्रपतिः **द्रौपदी मुर्मु** अद्य आन्ध्रप्रदेशस्य विशाखापट्टनमे आयोजिते **'अन्तर्राष्ट्रीय-नौसैन्य-बेड़ा-समीक्षा-२०२६'** (International Fleet Review) कार्यक्रमे सम्मिलिता भविष्यति। सशस्त्रबलानां सर्वोच्चसेनापतेः (Supreme Commander) रूपेण राष्ट्रपतिः औपचारिक-नौसैन्य-बेड़ायाः निरीक्षणं करिष्यति तथा च भारतस्य नौसैन्यशक्तेः समुद्रीक्षमतायाः च भव्यप्रदर्शनं द्रक्ष्यति।अन्तर्राष्ट्रीय-नौसैन्य-बेड़ा-समीक्षायाः आयोजनं १५ तः २५ फरवरी पर्यन्तं क्रियते। अस्मिन् समुद्री-अभ्यासे शततः (100+) अधिकाः देशाः भागं गृह्णन्ति।

# नेवापटलं विहाय, ई-विधान-प्रणालीं स्वीकरिष्यामः- कुलदीपसिंहपठानिया



विधानसभाध्यक्षः कुलदीपसिंहपठानिया महोदयः अवदत् यत् 'नेवा' (NeVA) पटल-सम्बन्धिताः समस्याः केन्द्रसर्वकाराय ज्ञापिताः। अनेन बहूनां सदस्यानां कष्टं भवति। एतां समस्यां दृष्ट्वा हिमाचल-विधानसभा स्वकीयां 'ई-विधान' प्रणालीं पुनः आरभते। मङ्गलवासरे प्रश्नकालात् पूर्वं विपक्षस्य नेता जयरामठाकुरः 'प्वाइण्ट ऑफ ऑर्डर' याचितवान्, परन्तु अध्यक्षः न दत्तवान्। विपक्षस्य नेता नेवा-पटलस्य अकार्यक्षमताविषये वक्तुम् इच्छति स्म। अध्यक्षः अवदत् यत् भारतसर्वकारस्य 'आईटी' विभागस्य निदेशकानुसारं पटलकार्यं सम्यक् प्रचलति, प्रश्नाः अपि 'अपलोड' भवन्ति। यदि कापि समस्या अस्ति तर्हि विधानसभा-सचिवालयाय लिखितेन अपि प्रश्नाः दातुं शक्यन्ते। अध्यक्षः उक्तवान् यत् 'नेवा' इत्यस्मात् अस्माकं 'ई-विधान' पटलम् अतीव उत्तमम् अस्ति।

**उपमुख्यमन्त्रिणा व्ययस्य तर्कं दत्वा प्रश्नं प्रतिहर्तुं निवेदितम्, बिक्रमस्य प्रतिषेधः**

प्रश्नकालकाले भाजपा-विधायकस्य बिक्रमसिंहस्य प्रश्नस्य उत्तरं यच्छन् उपमुख्यमन्त्री मुकेशअग्निहोत्री महोदयः सूचना-सङ्ग्रहे लक्षशः रूप्यकाणां व्ययस्य तर्कं दत्त्वा प्रश्नं प्रतिहर्तुं निवेदितवान्। प्रत्युत्तरे विधायकः बिक्रमः अवदत् यत् कियान् अपि समयः भवतु, सः प्रश्नं न प्रतिहरिष्यति। मुकेश महोदयः सहकारी- समितीनां पञ्जीकरणं- अनियमिततानां च निरीक्षणसम्बद्धे प्रश्ने अवदत् यत् अस्य उत्तर-सज्जीकरणे लक्षशः रूप्यकाणि व्ययितानि भविष्यन्ति, पत्राणां राशयः भविष्यन्ति। सहकारी-समितिषु एतावती अधिक-अनियमितता जाता यत् उत्तरं सज्जीकर्तुं बहु व्ययः भविष्यति। सः विधायकं प्रति निवेदितवान् यत् यस्य कस्यचित् विशिष्टप्रकरणस्य सूचना आवश्यकी चेत् सा दास्यते। उपमुख्यमन्त्री उक्तवान् यत् सर्वकारस्य मनसा सूचना-गोपनस्य नास्ति, उत्तरं विस्तृतं वर्तते अतः समयः लगति।

# HPU हिमाचलप्रदेश विश्वविद्यालयस्य सहायक- प्राध्यापकस्य द्वादश-कक्षायाः अङ्कपत्रिका मिथ्या निष्पन्ना, प्राथमिकी लेखिता

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेश- विश्वविद्यालये (एचपीयू) नियुक्तस्य एकस्य सहायक- प्राध्यापकस्य द्वादश-कक्षायाः अङ्कपत्रिका कथितरूपेण मिथ्या इति प्रकाशम् आगतम्। विश्वविद्यालयस्य लिखित-शिकायतायाः आधारेण पुलिसविभागेन अभियुक्तस्य विरुद्धे छलम् आरोपादिषु विविधासु धारासु अभियोगः लेखितः, अन्वेषणं च आरब्धम्। विश्वविद्यालयस्य पञ्जीयकः ज्ञानसागरनेगी इत्यनेन दत्त- शिकायतानुसारम् अभियुक्तः दूरवर्ती- शिक्षणसंस्थाने (सीडीओई) लोक-प्रशासनविभागे सहायक-प्राध्यापकत्वेन नियुक्तः आसीत्।१८ फरवरी २०२५ तमे दिने विश्वविद्यालयेन तेन नियुक्तिसमये समर्पितानि प्रपत्राणि विद्यालय- शिक्षामण्डलेन सत्यापितानि; तदा द्वादश-कक्षायाः अङ्कपत्रिका मिथ्या इति ज्ञातम्। ततः विश्वविद्यालय- प्रशासनेन तस्मै कारण- दर्शय- सूचना (कारणं दर्शयतु इति सूचना) प्रेषिता, उत्तरं च याचितम्। असंतोषजनक- उत्तरप्राप्तौ विश्वविद्यालयेन तस्य विरुद्धं बालूगञ्ज- पुलिसस्थानके शिकायतापत्रं दत्तम्। शिमला- जनपदस्य वरिष्ठ-पुलिस-अधीक्षकः गौरवः अवदत् यत् शिकायतायाः आधारेण अभियोगः लेखितः, अन्वेषणं च प्रवर्तते।

**समर्पित-अङ्कपत्रिकायाम् उत्तीर्णः, परीक्षायाम् अनुत्तीर्णः**

अभ्यर्थिनः चयनं सहायक-प्राध्यापक-पदाय अभवत्। प्रमाणपत्र- सत्यापनसमये तेन समर्पितायाम् अङ्कपत्रिकायां सर्वेषु विषयेषु उत्तीर्णः इति दर्शितम्; किन्तु प्राथमिक- शिक्षामण्डलेन परीक्षायां सः त्रिषु विषयेषु अनुत्तीर्णः इति ज्ञातम्। विश्वविद्यालयेन तस्मै कारण-दर्शय-सूचना प्रेषिता, यत् सः स्वपक्षं निवेदयेत्। अधुना नियमानुसारं विश्वविद्यालयेन प्राथमिकी लेखिता इति।

**-ज्ञानसागरनेगी, पञ्जीयकः, एचपीयू।**

**अङ्कपत्रिकायां सैद्धान्तिक-अङ्काः न दृश्यन्ते**

अभियुक्तेन उक्तं यत् प्रमाणपत्र- सत्यापनसमये विश्वविद्यालयेन मह्यं कारण-दर्शय-सूचना प्रेषिता, यतः अहं द्वादशकक्षायां त्रिषु विषयेषु अनुत्तीर्णः इति सूचितः। परं शिक्षा-मण्डलात् अन्वेषणेन ज्ञातं यत् परिणामपत्रे केवलं प्रायोगिक-अङ्काः एव दृश्यन्ते स्म, सैद्धान्तिकअङ्काः न प्रदर्शिताः। अहं २७ जनवरी तमे दिने संशोधित- अङ्कपत्रं विश्वविद्यालयाय समर्पितवान्, तथापि २९ जनवरी तमे दिने यथोचितप्रक्रियाम् अननुसृत्य विश्वविद्यालयेन मम विरुद्धं शिकायतापत्रं दत्तम्। अहं विधि-प्रक्रियया स्वपक्षं स्थापयिष्यामि।

# हिमाचल- विधानसभा- बजटसत्रम्: विधायक- निधि- स्थगनविषये सदने सुक्खु-जयरामयोः परस्परं वाग्युद्धम्



हिमसंस्कृतवार्ताः- शिमला। बजटसत्रस्य द्वितीयदिवसे मङ्गलवासरे प्रश्नकालानन्तरं सदने 'विधायक- क्षेत्रविकास- निधि' (MLA Priority Fund) स्थगनविषये मुख्यमन्त्री सुखविन्दरसिंहसुक्खु महोदयः विपक्षस्य नेता जयरामठाकुरश्च परस्परं सम्मुखम् अभवताम्। जयरामठाकुरः प्रश्नकालानन्तरं 'व्यवस्था-प्रश्नेन' (Point of Order) अमुं विषयं समुत्थापितवान् यत् विधायक- क्षेत्र- विकासनिधिः विमुक्ता करणीया। एषा निधिः बजट-घोषणायाः अनुरूपं दीयेत, अस्मिन् कर्तनं न करणीयम्। जयरामठाकुरः सदने उक्तवान् यत् विधायक-निधेः केवलं द्वे भागे एव लब्धे। तेभ्यः पत्राणि प्रेषितानि, किन्तु धनं न प्राप्तम्। प्रदेशः आर्थिकसङ्कटे अस्ति, सः अस्य निषेधं न करोति, परन्तु बजट-मध्ये घोषिता निधिः ऐच्छिक-निधिः च न कर्तनीया। सत्तापक्षस्य विधायकाः एतां निधिं प्राप्नुवन्ति स्युः, परन्तु विपक्षस्य विधायकाः न प्राप्नुवन्ति। अस्मिन् विधानसभाध्यक्षः अवदत् यत् विधायक-निधिविषये सर्वकारस्य विचारं मुख्यमन्त्री वदिष्यति। मुख्यमन्त्री सुक्खु महोदयः उक्तवान् यत् विधायकनिधिः कियान् विमुक्तव्यः, अस्मिन् विषये जयराममहोदयेन सह मिलित्वा चर्चां करिष्यामि। निधि-कर्तनविषये पुनर्विचारं करिष्यामि। 'पत्राणि' मा वितरन्तु, आवश्यकतानुसारं निधिः विमुक्ता भविष्यति।

## शून्यकाले रणधीरशर्मणा अपि उत्थापितः एषः विषयः

नयनादेवी-क्षेत्रस्य भाजपा-विधायकः रणधीरशर्मा अपि शून्यकाले अमुं विषयं समुत्थापितवान्। तस्मिन् समये मुख्यमन्त्री सदनात् बहिः आसीत्। रणधीरः अवदत् यत् विधायक-क्षेत्र-विकास-निधेः प्रावधानं बजट-मध्ये आसीत्। जुलाई-मासस्य भागेन अपि काचित् राशिः प्राप्ता, काचित् न। तदनन्तरं अक्तूबर-दिसम्बर मासयोः राशिः न आगता। एतस्य आरडीजी (RDG) प्रभावेण सह योजनं नोचितम्। सर्वेषां विधायकानां मनसि पीड़ा अस्ति। सत्तापक्षस्य विधायकाः अपि कथयन्ति यत् अयं विषयः तीव्रतया समुत्थापनीयः। द्वे भागे शीघ्रमेव विमुक्ते करणीये। अस्मिन् अध्यक्षः कुलदीपसिंहपठानिया उक्तवान् यत् एषः महत्त्वपूर्णः विषयः अस्ति, मुख्यमन्त्री अस्य उत्तरं दास्यति।

## हिमाचले ६०० राजकीय-भवनानि रिक्तानि- सुक्खुः

मुख्यमन्त्री सुखविन्दरसिंहसुक्खु महोदयः अवदत् यत् प्रदेशे ६०० राजकीय-भवनानि रिक्तानि सन्ति, अस्य सङ्ख्या इतः अपि अधिका भवितुम् अर्हति। भाजपा-विधायकस्य सतपालसिंहसत्ती महोदयस्य प्रश्नस्य उत्तरे मुख्यमन्त्री उक्तवान् यत् सर्वकारस्य प्रयासः भविष्यति यत् अस्मिन्नेव सत्रे एतां सूचनां सङ्गृह्य सदने प्रस्तूयेत। सत्ती महोदयः अवदत् यत् मण्डलमुख्यालयेभ्यः एषः वृत्तान्तः (Record) शीघ्रम् आगन्तव्यः। एकतः भवनानि रिक्तानि सन्ति, अपरतः बहवः कार्यालयाः निजी-भवनेषु प्रचलन्ति, येषां कृते सर्वकारः प्रतिमासं लक्षशः रूप्यकाणां भाटकं (Rent) ददाति।

# हिमाचलपरिवहनविभागस्य नूतननिर्देशाः १८-आसनयुक्तानां वाहनानां सञ्चालनम्



परिवहनविभागेन १८-आसनयुक्तानां (18-seater) टेम्पो-ट्रेवलर वाहनानां तथा १८-आसनयुक्तानां बस्-यानानां क्रयणं सञ्चालनं च अधिकृत्य सर्वेभ्यः क्षेत्रीयपरिवहन-अधिकारिभ्यः (RTOs) विस्तृताः निर्देशाः निर्गताः। विभागानुसारं राज्यसर्वकारेण निजीक्षेत्रे १८-आसनयुक्तानां 'स्टेज-कैरिज' वाहनानां सञ्चालनाय ३५० मार्ग-अनुमतिपत्राणि (Route Permits) स्वीकृतानि सन्ति।

**आबंटनप्रक्रिया:-** सम्बद्धैः क्षेत्रीयपरिवहन-प्राधिकारिभिः (RTO) पात्र-आवेदकेभ्यः 'ड्रॉ ऑफ लॉट्स' (भाग्यशलाका) माध्यमेन अथवा साक्षात् आबंटनेन अनुमतिपत्राणि प्रदीयन्ते। केषुचित् जनपदेषु आबंटनप्रक्रिया अधुनापि प्रचलन्ती अस्ति।

**विभागीयनिर्देशाः नियमाश्च:**

विभागेन स्पष्टीकृतं यत् मोटरयान-अधिनियमस्य (Motor Vehicle Act) अन्तर्गतं १८-आसनयुक्ताः टेम्पो-ट्रेवलर तथा १८-आसनयुक्ताः बस्-यानानि 'स्टेज-कैरिज' वर्गस्य वाहनेषु आगमिष्यन्ति, यदि ते अधिनियमस्य नियमानां च पालनं कुर्वन्ति। यानचालकाः (Operators) आबंटितमार्गानुमतिपत्राणाम् आधारेण 'फोर्स' (Force) सदृशानि १८-आसनयुक्तानि टेम्पो-ट्रेवलर वाहनानि क्रेतुं सञ्चालयितुं च शक्नुवन्ति। टाटा, सुजुकी अथवा अन्यासां कम्पनीनां द्वारा निर्मितानि १८-आसनयुक्तानि बस्-यानानि अपि अनुमतिपत्रानुसारं सञ्चालयितुं शक्यन्ते।

# हिमाचलप्रदेशे अतिक्रमणविषये नीतिनिर्माण-सम्बन्धे सर्वोच्चन्यायालयस्य कारणदर्शय- सूचना



**हिमसंस्कृतवार्ताः- शिमला।** सर्वोच्चन्यायालयेन अतिक्रमणप्रकरणेषु उच्चन्यायालयस्य आदेशानां सन्दर्भे विभागेन शिमलाजनपदस्य बागी, रतनाडी-प्रदेशयोः क्रियमाणकार्यवाही, अन्तरिमादेशेषु स्थगनादेशश्च प्रदत्तः। भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः तथा न्यायाधीशः जायमाल्य- बागची इत्येतयोः खण्डपीठेन राज्यसर्वकाराय अस्मिन् प्रकरणे कारण- दर्शय-सूचना निर्गतं कृतम्। तेन सह उच्चन्यायालयस्य रजिस्ट्रार-जनरलाय अपि सूचना प्रेषिता।

उच्चन्यायालये प्रचलितेषु अतिक्रमणप्रकरणेषु अग्रिमकार्यवाही अपि तत्कालप्रभावेन स्थगिता अस्ति। खण्डपीठेन स्पष्टतया उक्तं यत् अतिक्रमण- प्रकरणेषु नीतिनिर्माणसम्बन्धे दत्तेषु आदेशेषु राज्यसर्वकारेण किं कार्यं कृतम् इति स्पष्टीकर्तव्यम्। अस्य प्रकरणस्य अग्रिमश्रवणम् ६ अप्रैल (अप्रैलमासस्य षट् दिनांके) भविष्यति। राज्यसर्वकारेण १६ दिसम्बर २०२५ दिनाङ्के सर्वोच्चन्यायालयेन अतिक्रमणप्रकरणेषु नीतिनिर्माणार्थं दत्तादेशस्य अनुपालने अद्यावधि किम् कार्यं कृतम् इति स्पष्टतया निवेदनीयम्। अग्रिमश्रवणकाले राज्यसर्वकारेण स्वीयम् अनुपालनप्रतिवेदनं सर्वोच्चन्यायालये प्रस्तुतव्यं भविष्यति।

## १६ दिसम्बर २०२५ दिनाङ्के सर्वोच्चन्यायालयस्य आदेशाः

उल्लेखनीयम् यत् १६ दिसम्बर २०२५ दिनाङ्के सर्वोच्चन्यायालयेन प्रदेशसरकाराय अतिक्रमणप्रकरणेषु नीतिनिर्माणस्य आदेशाः दत्ताः आसन्। किन्तु प्रदेश-उच्चन्यायालयेन शिमलाजनपदस्य बागी तथा रतनाडी-प्रदेशयोः सम्बद्धायां जनहितयाचिकायां स्वीयादेशानाम् अनुपालनं कर्तुं निर्देशः दत्तः। उच्चन्यायालयस्य खण्डपीठेन शिमलाजनपदस्य उपायुक्ताय तथा ठियोग- विभागस्य वनाधिकरिणे (डी.एफ.ओ.) सर्वेषाम् अतिक्रमणकारिणां विषये विस्तृतप्रतिवेदनं प्रस्तुतुं निर्देशः दत्तः। अस्मिन् प्रतिवेदने प्रत्येकस्य अतिक्रमणकारिणः सम्पूर्णविवरणं दातव्यम्। अतिक्रमणकारिणः नाम, सम्बद्धग्रामस्य विवरणम्, तस्य नाम्ना स्वकीय- निजभूमेः परिमाणम्, वनभूमेः कियद् क्षेत्रं यावत् अवैधकब्जः कृतः इति सर्वं विवरणं दातव्यम्। न्यायालयेन स्पष्टतया उक्तं यत् एतत् सर्वं विवरणं १५ फरवरी २०२६ दिनाङ्कात् पूर्वं वा तस्मिन् दिने न्यायालये प्रस्तुतव्यं भवेत्। एषः विषयः २४ फरवरी दिनाङ्के उच्चन्यायालये श्रवणार्थं सूचीबद्धः अस्ति।

## आदेशस्य सर्वोच्चन्यायालये एस.एल.पी. द्वारा आह्वानम्

बागीग्रामनिवासिनः विकेश रोहटा तथा अन्ये केचन जनाः उच्चन्यायालयस्य अस्य आदेशस्य विरुद्धं सर्वोच्चन्यायालये विशेषानुमतियाचिका (एस. एल. पी.) प्रदानस्य आह्वानं कृतवन्तः। अस्मिन् प्रकरणे सर्वोच्चन्यायालये अधिवक्ता नरेश तोमरः पक्षं प्रस्तौति। तेन उक्तं यत् सर्वोच्चन्यायालयस्य आदेशानां सत्तायामपि हिमाचल- उच्चन्यायालयः अवैधस्वामित्वान् अपाकर्तुं निरस्तीकरणस्य आदेशान् ददाति, यत् सर्वथा न्यायसंगतं नास्ति। किसान-नेता राकेश सिंह उक्तवान् यत् द्वौ मासौ अतीतौ, तथापि राज्यसर्वकारेण नीतिनिर्माणविषये किमपि न कृतम्।

# याचनानां पूर्तये चौड़ा-मैदाने गर्जिताः सेवानिवृत्त- कर्मचारिणां (Pensioners), सर्वकारस्य उपरि गम्भीराः आरोपाः तीव्रं घोषणम्



**हिमसंस्कृतवार्ताः- शिमला।** विधानसभा-सत्रस्य द्वितीयदिवसे मङ्गलवासरे 'पैंशनर्ज संयुक्त संघर्ष समिति' इत्यनेन याचनानां पूर्तये चौड़ा-मैदाने एकत्रिताः भूत्वा प्रदर्शनं विहितम्। ते प्रदेशसर्वकारस्य उपरि 'वचनभङ्गस्य' आरोपं कृतवन्तः। वित्तीयसङ्कटस्य तर्कं दत्त्वा सर्वकारस्य विरुद्धं तीव्रं घोषणं (Sloganeering) कृतवन्तः। सूच्यते यत् राज्यसर्वकारस्य बजटसत्रस्य द्वितीयदिवसे शिमलायां सेवानिवृत्त- कर्मचारिणः राजमार्गेषु अवतीर्णाः।

संयुक्त-सङ्घर्ष-समित्याः ध्वजच्छायायां सेवानिवृत्त- कर्मचारिणः स्वकीयानां लम्बित-याचनानां कृते रोष-प्रदर्शनं कृतवन्तः। ते सर्वकारस्य उपरि कर्मचारी-निवृत्त-विरोधिनीतीनां पालनस्य गम्भीराः आरोपाः कृतवन्तः। समित्याः कथनम् अस्ति यत् २८ नवम्बर २०२५ दिनाङ्के धर्मशालायाः जोरावर- क्रीडाङ्गणे अपि सहस्रशः निवृत्त- कर्मचारिणः विरोधयात्राम् अकुर्वन्। तस्मिन् समये मुख्यमन्त्रिणा विधानसभायां मण्डलेन सह वार्तालापस्य आश्वासनं दत्तम् आसीत्, परन्तु अद्यापि कापि गोष्ठी न आहूता।

## द्विमुखी-नीत्याः आरोपः

समित्या आरोपः कृतः यत् प्रदेशसर्वकारः 'वित्तीयसङ्कटस्य' व्याजं कृत्वा निवृत्त-कर्मचारिणां महार्घता- भत्तां (DA), 'एरियर' (Arrears) अन्यान् च लाभान् अवरुद्धवान् अस्ति, अपरतः जनप्रतिनिधीनां वेतन-वृत्तिषु तथा आयोगाणां पदाधिकारिणां निवृत्तिवेतने (Pension) वृद्धिः क्रियते।

## निवृत्त-कर्मचारिणां मुख्याः याचनाः

समित्याः प्रमुखासु याचनासु अधोलिखिताः विषयाः सम्मिलिताः सन्तिः

१. वित्तीय-लाभाः: १ जनवरी २०१६ तः ३१ जनवरी २०२२ पर्यन्तं सेवानिवृत्त-कर्मचारिणां 'ग्रैच्युटी' (Gratuity), 'लीव इन कैशमैंट' (Leave Encashment), 'कम्यूटेशन' (Commutation), संशोधित- निवृत्तिवेतनस्य च पूर्णं प्रदानम्।

२. महार्घता-वृत्तिः १३ प्रतिशतं महार्घता-वृत्ति (DA) तथा लम्बित-एरियर-इत्यस्य भुक्तिः।

३. विभागीय-भुक्तिः विभिन्न-बोर्ड-निगमानां, परिवहन- विद्युत्-विश्वविद्यालयानां च निवृत्त- कर्मचारिभ्यः समयपालनेन वेतन-प्रदानम्।

## बजट-दिने उग्र-प्रदर्शनस्य सचेतना

समित्याः अध्यक्षः सुरेशठाकुरः सचेतितवान् यत् यदि वार्तालापार्थं शीघ्रमेव न आहूयते, तर्हि यस्मिन् दिने 'बजट' प्रस्तूयेत, तस्मिन् दिने सहस्रशः निवृत्त- कर्मचारिणः विधानसभायाः बहिः उग्रं प्रदर्शनं करिष्यन्ति। सः अवदत् यत्- "एकतः सर्वकारः आर्थिकस्थितेः रोदनं करोति, अपरतः राजकीयविभागेषु कोटिशः रूप्यकाणां वाहनानि क्रीयन्ते। वयं सर्वकारस्य एतादृशीं द्विमुखी-नीतिं न सहिष्यामः।"

# नेपालेन स्कॉटलैण्ड्-देशः सप्तक्रीडकैः (विकेट्) पराजितः




**नेपालस्य विजयः** पुरुष टी20 क्रिकेट विश्वचषके गतरात्रौ नेपालेन स्कॉटलैण्ड्-देशः सप्तक्रीडककैः (विकेट्) पराजितः। प्रथमं फलकक्रीडां कुर्वन् स्कॉटलैण्ड्-देशेन नेपालं पुरतः १७१ धावनाङ्कानां (रन्) लक्ष्यं स्थापितम्। नेपालदलेन १९ ओवर्-द्वयधिककन्दुकैः च एतद् लक्ष्यं प्राप्तम्। नेपालस्य दीपेन्द्रसिंहः सर्वाधिकं ५० धावनाङ्कान् अकरोत्, सः च 'प्लेयर ऑफ द मैच' इति घोषितः। नेपालः टॉस-स्पर्धां जित्वा प्रथमं क्षेत्ररक्षणस्य (फील्डिंग) विकल्पं चितवान् आसीत्।

**ऑस्ट्रेलिया बहिर्गता,** जिम्बाब्वे प्रवेशं कृतवती अपरपक्षे, ऑस्ट्रेलिया-दलम् अस्मात् स्पर्धातः बहिर्भूतम् अभवत्। एतद् तदा अभवत् यदा गतदिने श्रीलङ्कायाः पल्लेकेले स्थाने जिम्बाब्वे-आयरलैण्ड् देशयोः मध्ये महत्वपूर्णा स्पर्धा निरन्तरवृष्ट्या कारणेन एकमपि कन्दुकं विना निरस्ता जातः। अङ्कानां आधारेण, जिम्बाब्वे 'ग्रुप बी' तः सुपर-८ चरणाय प्रवेशं कुर्वती द्वितीयं दलीयम् अभवत्। श्रीलङ्का तु एकं क्रीडां शेषं कृत्वा एव सुपर-८ कृते स्थानं सुरक्षितं कृतवती। सुपर-८ चरणस्य अन्यानि दलानि द्विवारं विजेता वेस्ट इण्डीज 'ग्रुप सी' तः सुपर-८ चरणाय प्रवेशं कुर्वतः प्रथमं दलम् अभवत्। तथैव द्विवारं विजेता इङ्ग्लेण्ड् 'ग्रुप सी' तः द्वितीयं दलम् अभवत्। रक्षणकर्ता विजेता (डिफ़ेन्डिंग चैम्पियन) भारतम् 'ग्रुप ए' तः सुपर-८ चरणाय प्रवेशं कृतवत्।

# सहकारतः समृद्धिः केवलं उद्घोषः नास्ति, अपि तु ग्रामं ग्रामं प्रति प्रचलन् विकासप्रतिरूपः अस्ति- अनुरागठाकुरः



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।'सहकारतः समृद्धिः' अधुना केवलं कश्चन उद्घोषः नास्ति, अपि तु ग्रामं ग्रामं प्रति प्रचलन् कश्चन विकास- प्रतिरूपः (Model) जातः अस्ति, यः अग्रिमेषु वर्षेषु 'आत्मनिर्भर-भारतस्य' आधारशिलां सुदृढां करिष्यति। मोदी-सर्वकारस्य २०२६-२७ वर्षस्य बजटपत्रं 'सहकारतः समृद्धिः' इति भावनाम् अधिकं प्रबलां करिष्यति। पूर्वकेन्द्रीयमन्त्री अनुरागसिंहठाकुरः स्वकीय-निवेदने अवदत् यत् केन्द्रीय-बजट २०२६-२७ सहकारी-क्षेत्राय सुदृढं प्रोत्साहनं ददाति। एतत् केवलं प्रतीकात्मकं बजटं नास्ति, अपि तु एकं परिणाम- उन्मुखं प्रारूपम् (Framework) अस्ति, यत् प्राथमिक- कृषि- ऋणसमितीः (PACS), सहकारी-विपणनम्, निर्यातं, मूल्य-संवर्धनं ग्रामीण-जीविकां च सुदृढं करोति।

**पीएसीएस- इत्यस्य अङ्कीकरणं बजट-प्रावधानं च**

सासंदः अवदत् यत् राष्ट्रियस्तरे सहकारिता-मन्त्रालयाय २०२६-२७ वर्षाय १,७४४.७४ कोटिरूप्यकाणि प्रदत्तानि सन्ति। अस्मिन् मुख्यं बलं पीएसीएस (PACS) इत्यस्य सङ्गणकीकरणे (Computerization) अस्ति, यस्य कृते केवलं ३६४ कोटिरूप्यकाणि आबंटितानि। अनेन सहस्रशः समितयः स्वकीयान् वृत्तान्तान् (Accounts) अङ्कीकृत्य 'कोर बैंकिंग सिस्टम', 'डीबीटी' (DBT) मञ्चैः तथा कृषि-विपणनद्वारैः (Portals) सह संलग्नाः भवितुं शक्ष्यन्ति। अनेन व्यवहारव्यये (Transaction cost) न्यूनता भविष्यति, ऋण- अनुशासने च परिष्कारः भविष्यति, येन कोटिशः कृषकसदस्याः समयपालनेन संस्थागत-वित्तं प्राप्तुं शक्ष्यन्ति।

## सूचना-तन्त्रांशः (IT) तथा प्रशिक्षणम्

पीएसीएस-अङ्कीकरणस्य पूर्तये सहकारिणां सूचना- तन्त्रांश- हस्तक्षेपाय (IT Interventions) २६ कोटिरूप्यकाणि प्रदत्तानि। अस्मिन् सॉफ्टवेयर-मानकीकरणे, प्रशिक्षणे तथा शासन- परिष्कारेषु ध्यानं दत्तम् अस्ति। एषः डिजिटल- निवेशः सहकारी-समितीः पारदर्शिकाः बैंकेबल (Bankable) च निर्मास्यति।

## भण्डारणं निर्यातं च

अनुरागठाकुरः सूचितवान् यत् राष्ट्रिय-सहकारी- विकासनिगमाय (NCDC) ५०० कोटिरूप्यकाणि लब्धानि सन्ति, येन भण्डारणं, शीत-शृङ्खला (Cold Chain), दुग्ध-मत्स्यपालने च सहकारी-प्रकल्पेभ्यः धनं लप्स्यते। 'राष्ट्रिय सहकारी निर्यात लिमिटेड' इत्यस्य कृते ४५० कोटिरूप्यकाणाम् ऐतिहासिकम् आबंटनं कृतम्। अनेन कृषक-उत्पादक- सहकारिणः साक्षात् अन्तर्राष्ट्रीय-मूल्यशृङ्खलाभिः सह संलग्नाः भविष्यन्ति, येन वैदेशिकमुद्रायाः आयः वर्धिष्यते।

राजकोषीय-पक्षे अपि अनेन बजट-पत्रेण लक्षिताः कर-उपायाः (Tax measures) प्रस्तुताः सन्ति, येन सहकारिणां 'बैलेंस-शीट' (Balance Sheet) सुदृढा भविष्यति।

## " वन्दे संस्कृतमातरम्"
## " लौकिकन्यायकोशः"
## (४०३)
## " चन्द्रज्योत्स्नान्यायः"

ज्योत्स्ना नाम चन्द्रस्य प्रकाशः। अतः ज्योत्स्नाशब्दस्य स्थाने चन्द्रज्योत्सना इति शब्दप्रयोगः अनावश्यकः । तथापि क्वचित् विशिष्टं प्रयोजनम् उद्दिश्य तादृशानि वाक्यानि प्रयुज्यन्ते । यथा--

चन्द्रज्योत्स्नाशरदि पुलिने सैकतेस्मिन् सरय्वाः,वादद्यूतं चिरतरमभूत् सिद्धयूनोः कयोश्चित् ।
एको वक्ति प्रथमनिहितं कैटभं कंसमन्यः, स त्वं तत्वं कथय भगवन् को हतस्तत्र पूर्वम् ।।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

## वार्ता-संवादः

काव्या- नमस्ते नन्दिनि।

नन्दिनी- प्रथमा वार्ता श्रूयताम्। आङ्ग्ल-देशे एकेन 'अमाजन'-संस्थायाः चालकेन महान् प्रमादः कृतः। तेन मार्गदर्शक-यन्त्रस्य आदेशः अन्धवत् पालितः, अतः तस्य वाहनं जलेन पूर्ते गर्ते पातितम्।

काव्या- अहो मौर्ख्यम्! तस्य बुद्धिः कुत्र गता? इदानीं ऑस्ट्रेलिया-देशस्य काचित् धूर्तता श्रूयताम्। तत्र एकेन नरेण भोजनालये देयक-पत्रस्य धनं दातुम् अनिच्छता स्वेद-केशः अन्ने क्षिप्तः। किन्तु सा तस्कर-क्रिया गुप्त-चित्रग्राहकेण दृष्टा।

नन्दिनी- छी! एतत् तु अतीव जुगुप्सितम्। अन्या काचित् विचारातीता वार्ता अस्ति। चीन-देशस्य एकया महिला-शिक्षिकया अध्यापन-कार्यं त्यक्तम्। सा अधुना 'यूरोप'-देशाय शव-पेटिकाः विक्रीतवती अस्ति। अनया वृत्या तया प्रभूतं धनम् अर्जितम्।

काव्या- विचित्रा खलु संसारस्य गतिः। अन्तिमा वार्ता अपि उदर-पीडां जनयति। एकस्मिन् चलच्चित्रे दृश्यते यत् 'जलपुरिका'-खाद्य-मिश्रणात् एकः मूषकः बहिः कूर्दितः। तत् दृष्ट्वा भोजनालयस्य स्वच्छता-विषये जनैः चिन्ता कृता।

नन्दिनी- धिक् तत् भोजनम्! अस्तु, अद्यतन-समाचारः समाप्तः। पुनर्मिलामः।

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**



# पञ्जाब- विश्वविद्यालयस्य संस्कृतविभागे द्विदिवसीय- संस्कृत- शिक्षण- कार्यशालायाः आयोजनम्






**हिमसंस्कृतवार्ताः चण्डीगढ़म्।**

पञ्जाब- विश्वविद्यालयस्य संस्कृतविभागेन संस्कृतभारत्याः, भारतीयभाषासमित्याः च संयुक्ततत्त्वावधाने "संस्कृतमाध्यमेन संस्कृतशिक्षणम्" इति विषये द्विदिवसीय- प्रशिक्षण- कार्यशालायाः आयोजनं कृतम्।उद्घाटनसत्रस्य प्रारम्भः विश्वविद्यालयस्य कुलगीतेन अभवत्। तदनन्तरं वैदिकमन्त्रोच्चारणेन सह दीपप्रज्वलनं कृत्वा कार्यक्रमस्य शुभारम्भः जातः। विभागाध्यक्षा डॉ. सुनीता देवी कार्यशालायाः रूपरेखां प्रस्तुतवती, सर्वेषाम् अतिथीनां स्वागतं च कृतवती।

उत्तरक्षेत्रस्य संगठनमन्त्री नरेन्द्र महोदयः स्वोद्बोधने उक्तवान् यत्- "संस्कृतं विश्वपोषकभाषा अस्ति। वयमपि संस्कृतस्य योद्धारः रक्षकाः च भवेम। अस्माकं भारतं शस्त्रस्य शास्त्रस्य च धारकं भवतु। एषः समयः संस्कृतस्य अस्ति। आगामि-पीढ्याः संगणकाः (Computers) संस्कृतभाषाधारिताः भविष्यन्ति, यतः संस्कृतं वैज्ञानिकभाषा वर्तते।"

प्रो. योजना रावत महोदया अवदत् यत् संस्कृतविभागः प्रशंसनीयं कार्यं करोति। अत्र उपस्थिताः प्राध्यापकाः शिक्षकाः च श्रद्धापूर्वकं अस्मिन् कार्ये संलग्नाः सन्ति।

## विशिष्टातिथिः चाँद किरण सलूजा महोदयः प्रश्नं कृतवान् यत्-

किं वयं संस्कृतस्य मूलग्रन्थान् अवबोधपूर्वकं पठितुं समर्थाः स्मः?

किं वयं टीकां विना अध्ययनं कर्तुं शक्नुमः? तेन उक्तं यत् भाषा केवलं विद्यालये पठनेन न आगच्छति, अपि तु सा वातावरणेन विकसिता भवति। शिक्षायाः उद्देश्यं मनुष्यस्य अन्तर्निहितज्ञानस्य प्रकाशकम् अस्ति। उद्घाटनसत्रस्य अध्यक्षता वीरेन्द्रकुमार अलंकार महोदेन कृता।

## शैक्षणिक-सत्राणि

तदनन्तरं त्रिणां शैक्षणिकसत्राणाम् आयोजनं जातम्।

**प्रथमसत्रे** डॉ. चन्दनलालस्य अध्यक्षतायाम् अभवत्। मुख्यवक्ता सलूजा महोदयः अवदत् यत् भारतस्य सर्वाणि पाठ्यपुस्तकानि भारतीयभाषासु सन्ति। अतः संस्कृतस्य अध्यापनं संस्कृतभाषायामेव भवेत्। सः छात्रैः सह संवादात्मक- गतिविधीः अपि कारितवान्।

द्वितीयसत्रे नरेन्द्रमहोदयः "संस्कृतस्य वर्तमानसमस्या, समाधानं भविष्ययोजना च" इति विषये व्याख्यानं दत्तवान्। सः संस्कृतक्षेत्रे विद्यमानान् आह्वानान् (Challenges) स्पष्टीकृतवान्।

तृतीयसत्रे संजीवकुमारमहोदयः "संस्कृतसम्भाषणस्य महत्त्वम्" इति विषये स्वविचारान् प्रकटितवान्। सः उक्तवान् यत् संस्कृतस्य संरक्षणं तदैव सम्भवं यदा वयं एतां व्यवहारभाषां करिष्यामः।

**निष्कर्षः-**

अस्यां कार्यशालायां पञ्जाब-हरियाणा-चण्डीगढतः शिक्षकाः सक्रियरूपेण भागं गृहीतवन्तः। इयं कार्यशाला संस्कृतशिक्षणस्य सुदृढपद्धतेः तथा प्रचार-प्रसारस्य दृष्ट्या अतीव सफला सार्थका च सिद्धा।

# कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयाय 'महाराष्ट्रस्य सर्वश्रेष्ठ-केन्द्र-पुरस्कारः'




## विद्याभारती-उच्चशिक्षासंस्थानेन

**'भारतीयज्ञानपरम्परायाः' प्रचार-प्रसारार्थं प्रदत्तः पुरस्कारः**

हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्।भारतस्य प्राचीन-इतिहास-कला-समाज-संस्कृति-विज्ञान-प्रौद्योगिकीभिः सह नूतन-कालस्य छात्रान् परिचाययितुं तथा च भारतस्य समृद्ध-स्वरूपस्य बोधं कारयितुं विद्या भारती-उच्चशिक्षा संस्थानेन भारतीयज्ञानपरम्पराधारितं २१ पुस्तकानां एकः सञ्चः (Set) सज्जीकृतः अस्ति। अस्मिन् सञ्चे कला-सामाजिकविज्ञान-विज्ञान-प्रौद्योगिकी-विषयेषु आधारितानि सप्त-सप्त पुस्तकानि सम्मिलितानि सन्ति। एतस्य सञ्चस्य आधारेणैव 'भारतबोधः' इति राष्ट्रिय-परीक्षायाः आयोजनं देशस्य विविधेषु महाविद्यालयेषु विश्वविद्यालयेषु च विहितम्।

रामटेक-स्थितस्य कविकुलगुरुकालिदाससंस्कृत-विश्वविद्यालयस्य 'भारतीयज्ञानकेन्द्रम्' इत्यनेनापि एतस्याः परीक्षायाः आयोजनं केन्द्रप्रमुखायाः प्रो. कलापिनी अगस्ती महोदयायाः मार्गदर्शने कृतम्। अस्याः परीक्षायाः नोडल-अधिकारी वेदविद्यासङ्कायस्य अधिष्ठाता तथा IKS केन्द्रस्य सह-अन्वेषकः प्रो. हरेकृष्ण अगस्ती महोदयः आसीत्। परीक्षार्हि-छात्राणां मार्गदर्शनाय परीक्षातः पूर्वं २१ दिवसीय-विशेष-कार्यशालायाः आयोजनं कृतम्। विश्वविद्यालयात् २०० तः अधिकाः छात्राः सोत्साहं भागं गृहीतवन्तः, उत्कृष्टान् अङ्कान् च प्राप्तवन्तः।

विद्याभारती-उच्चशिक्षासंस्थानेन आयोजितायाम् अस्यां परीक्षायां सोत्साह-प्रतिभागाय, भारतस्य बौद्धिक-परम्परायाः सुदृढीकरणाय तथा च भारतीयज्ञानपरम्परायाः प्रचार-प्रसारे विश्वविद्यालयस्य उल्लेखनीय-योगदानाय कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः महाराष्ट्रस्य 'सर्वश्रेष्ठ-केन्द्रम्' इति घोषितः सम्मानितश्च। जयपुर-नगरे आयोजितायां 'संस्था धुरीणानां राष्ट्रिय-परिषदि' प्रो. हरेकृष्ण अगस्ती महोदयः महाराष्ट्रस्य सर्वश्रेष्ठ-केन्द्रस्य एतं पुरस्कारं स्वीकृतवान्।

महाराष्ट्रराज्ये सर्वश्रेष्ठ-केन्द्रस्य गौरवं प्राप्य माननीयः कुलगुरुः डॉ. अतुल वैद्यः महोदयः IKS केन्द्रप्रमुखाम् प्रो. कलापिनी अगस्तीं, सह-अन्वेषकं प्रो. हरेकृष्ण अगस्तीं तथा च सर्वान् छात्रान् हार्दिकम् अभिनन्दितवान्। सः अवदत् यत् एषः पुरस्कारः विश्वविद्यालयस्य IKS केन्द्रेण क्रियमाणस्य लोकाभिमुख-अनुसन्धानस्य तथा भारतीयज्ञानपरम्परायाः समर्पित-प्रचार-प्रसारस्य महत्वपूर्णं मन्थनम् अस्ति।

# दिल्लीनगरे ७५ 'सीएम श्री' विद्यालयानाम् उद्घाटनम्




केन्द्रीयशिक्षामन्त्री धर्मेंद्रप्रधानः नूतनदिल्लीनगरे ७५ 'सीएम श्री' विद्यालयानाम् उद्घाटनं कृतवान्। सरोजिनीनगरे स्थितस्य 'सीएम श्री' विद्यालयस्य उद्घाटनवसरे श्रीप्रधानः अवदत् यत् एते विद्यालयाः मुख्यरूपेण मध्यमवर्गीय-आर्थिकदुर्बलपरिवाराणां बालकेभ्यः गुणवत्तापूर्णशिक्षायाः आधुनिक-आधारभूतसंरचनायाः च गारण्टीं (विश्वासं) ददति।

## दिल्ली-शिक्षायाः स्वरूपम्-

तेन सूचितं यत् दिल्लीनगरे प्रायः ४५ लक्षं बालकाः पठन्ति, येषु प्रायः २० लक्षं निजीविद्यालयेषु तथा २५ लक्षं सर्वकारीय-नगरनिगमविद्यालयेषु अध्ययनं कुर्वन्ति। श्रीप्रधानः अकथयत् यत् दिल्ली सम्पूर्णस्य देशस्य प्रतिनिधित्वं करोति, अतः अस्याः शिक्षायाः मानदण्डाः राष्ट्रियमानकत्वेन भवेयुः। सः एकाब्दस्य अन्तरे ७५ विद्यालयानां प्रारम्भाय दिल्लीसर्वकारस्य प्रशंसां कृतवान्, एतत् शिक्षासुधारं प्रति तेषां प्रतिबद्धतां दर्शयति इति च उक्तवान्।

## मुख्यमन्त्रिणः वक्तव्यम्-

पत्रकारैः सह सम्भाषणे मुख्यमन्त्री रेखा गुप्ता अवदत् यत् एतेषां ७५ नूतनविद्यालयानां निर्माणं निजीसंस्थानां सदृशगुणवत्तायुक्त-आदर्शसर्वकारीयविद्यालयरूपेण कृतम् अस्ति। सा उक्तवती यत् बालकेभ्यः उत्तमाः कक्षाः उत्तमाः अवसराः च प्रदातुं विशेषं ध्यानं दत्तम् अस्ति।

**आधुनिकाः सुविधाः**-अस्यां योजनायां 'कोडिंग' कौशलं तथा साइबर-जागरुकतां वर्धयितुं ४० सङ्गणकैः (Computers) युक्ता सूचना-सञ्चार-प्रौद्योगिकी (ICT) प्रयोगशाला स्थापिता अस्ति।

**डिजिटल-पुस्तकालयः**: ११ विद्यालयान् संयोजयन् एकः 'डिजिटल' पुस्तकालय-सञ्जालः (Network) अपि प्रारब्धः।

**भाषा-प्रयोगशाला-** जर्मन, जापानी, फ्रेञ्च, स्पेनिश सदृशानां विदेशीभाषाणां पाठ्यक्रमान् प्रदातुं भाषा-प्रयोगशालाः अपि निर्मिताः सन्ति।

# चलच्चित्रजगतः मुख्याः वार्ताः

## सलीम खानस्य स्वास्थ्यम्

दिग्गज-पटकथालेखकः सलीम खानः मुम्बईनगरस्य लीलावती-रुग्णालयस्य अतिदक्षताविभागे (ICU) प्रवेशितः अस्ति। रुग्णालयस्य विवरणानुसारं तस्य स्थितिः स्थिरा वर्तते, किन्तु सः चिकित्सकानां तीक्ष्णनिरीक्षणे अस्ति। सलमान खानस्य पूर्वप्रिया सोमी अली तस्य शीघ्रस्वास्थ्यलाभाय 'इन्स्टाग्राम' माध्यमेन एकां भावपूर्णां टिप्पणीं (Post) साझां कृतवती।

## सिद्धार्थ मल्होत्रायाः पितुः निधनम्

अभिनेतुः सिद्धार्थ मल्होत्रायाः पिता सुनील मल्होत्रा दिवङ्गतः। सः किञ्चित् कालात् अस्वस्थः आसीत्। चलच्चित्रजगतः अनेकाः गण्यमान्याः व्यक्तयः अस्मिन् दुःखदवार्तायां शोकं प्रकटितवन्तः।

## प्रवीणा देशपाण्डे इत्यस्याः देहावसानम्

इमरान हाशमी महोदयस्य सद्यः प्रसादितायां 'तस्करी' इति अन्तर्जाल-शृङ्खलायां (Web Series) दृष्टा अनुभवी अभिनेत्री प्रवीणा देशपाण्डे ६० तमे वयसि पञ्चत्वं गता।

## राजपाल यादवाय उपशमः (Relief)

अभिनेता राजपाल यादवः 'चेक बाउन्स' प्रकरणे उपशमं प्राप्तवान्। उच्चन्यायालयतः तस्मै १८ मार्च पर्यन्तं अन्तरिम-प्रतिभूः (Interim Bail) दत्ता, येन सः कारागारात् बहिः आगतवान् अस्ति।

## मुम्बई-जलवायु-सप्ताहः (Climate Week)

मध्यमप्रदेशस्य मुख्यमन्त्री डॉ. मोहन यादवः अद्य मुम्बईनगरे प्रचलतः 'क्लाइमेट वीक-२०२६' इत्यस्य विशेषसत्रे अध्यक्षतां करिष्यति। अस्मिन् सत्रे नवीकरणीय-ऊर्जा तथा ऊर्जा-सञ्चय-विषयेषु चर्चा भविष्यति। एषः कार्यक्रमः १९ फरवरी पर्यन्तं प्रचलति।

## वातावरणस्य परिवर्तनम्

भारतीय-जलवायु-विभागानुसारं (IMD) महाराष्ट्रस्य अनेकेषु भागेषु अधिकतमं तापमानं सामान्यात् २-४°C अधिकं भवितुम् अर्हति। तथापि, उत्तरभारते हिमपातस्य कारणात् प्रातः रात्रौ च मन्दा शीतलता भविष्यति।

# रक्षासम्बन्धेषु नवीनः अध्यायः टाटा-एयरबस् हेलीकॉप्टर-संयन्त्रस्य उद्घाटनम्

रक्षामन्त्री राजनाथ सिंहः अद्य उक्तवान् यत् फ्रांस-देशेन सह दीर्घकालिका सामरिक-सहभागिता (Strategic Partnership) विविधक्षेत्रेषु सहयोगस्य असीमितान् अवसरान् सृजितवती अस्ति। रक्षामन्त्री कर्नाटकराज्यस्य वेमागल स्थाने 'टाटा इलेक्ट्रॉनिक्स' तथा 'एयर बस्' इत्यनयोः H125 लाइट यूटिलिटी हेलीकॉप्टर असेंबली संयन्त्रस्य उद्घाटनसमारोहं सम्बोधयति स्म। रक्षामन्त्रिणा सूचितं यत् वेमागल-संयन्त्रे एकसहस्रकोटि (१००० Cr) रूप्यकाणां निवेशः भविष्यति, येन व्यापकरूपेण रोजगारस्य अवसराः उत्पत्स्यन्ते। तेन उक्तं यत् H125 'सिंगल इञ्जन' हेलीकॉप्टर-यानं वैश्विकस्तरे विश्वसनीयं वर्तते तथा च अस्य निर्याते (Export) अपाराः सम्भावनाः सन्ति।